श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतेः कृतिषु

# ॥ श्रीनृसिंह पञ्चरत्नम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri Ananthanarayana of Chennai for providing the text of this stotram.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनृसिंह पञ्चरत्नम् ॥

घटिकाचलमालयमादधता शरणागतरक्षणमाचरता।
करुणाकलितेन जगत्पतिना न विना मम याति मुदं हृदयम्॥ १ ॥

वसतिं कुरुषे घटिकाद्रिवरं हृदयं च मदीयमदस्सदय।
नरसिंह विहाय विभो कपटं वद कुत्र मनो भवतो रमते॥ २ ॥

घटिकाचलवासिनमीशमजं सततं स्मरतां क्व सतामशुभम्।
यदि कोऽपि भवेदशुभस्य लवो रुचिराशिरुदेष्यति पाशि दिशि॥ ३ ॥

बहवोऽवतरा विलसन्तु मधुं द्विषतो निजविग्रहतोऽप्यधिकम्।
घटिकागिरिराड्वसतौ नृहरौ करुणावति मे रमते हृदयम्॥ ४ ॥

चरणागतान्परमसात्त्विकान् ऋषीन् करुणावलोकनिकरेण लालयन्।
घटिकाद्रिसीमनि नृसिंहविग्रहो जगतां पतिर्वसति वासवार्चितः ॥ ५ ॥

॥ इति श्रीनृसिंह पञ्चरत्नं संपूर्णम् ॥

www.prapatti.com